# उज्ज्वलनीलमणिकिरणः

विश्वनाथचक्रवर्तिविरचितः

नीयल्देल्मानिकोनाम्ना सम्पादितः

(Visvanatha Cakravartin's "Ray of the Blazing Sapphire")

(edited by Neal Delmonico)

अथोज्ज्वलरसस्तत्र नायकचूडामणिः श्रीकृष्णः । प्रथमं गोकुलमथुराद्वारकासु क्रमेण पूर्णतमः पूर्णतरः पूर्ण इतित्रिविधः । धीरोदात्तः धीरललितः धीरोद्धतः धीरशान्तः इतिप्रत्येकं चतुर्विधः । तत्र रघुनाथवत् गम्भीरो विनयी यथार्हसर्वजनसम्मानकारीत्यादिगुणवान् धीरोदात्तः । कन्दर्पवत् प्रेयसीवशो निश्चिन्तो नवतारुण्यो विदग्धो धीरललितः । भीमसेनवत् उद्धतः आत्मश्लाघारोषकैतवादिगुणयुक्तो धीरोद्धतः । युधिष्ठिरवत् धार्मिको जितेन्द्रियः शास्त्रदर्शी धीरशान्तः । पुनश्च पत्युपपतित्वेन प्रत्येकं स द्विधः । एवं पुनश्चानुकूलो दक्षिणः शठो धृष्ट इतिप्रत्येकं चतुर्विधः । एकस्यामेव नायिकायामनुरागी अनुकूलः सर्वत्र समो दक्षिणः साक्षात् प्रियं वक्ति परोक्षेऽप्रियं करोति यः स शठोऽन्यकान्तासम्भोगचिह्नादियुक्तोऽपि निर्भयो मिथ्यावादी यः स धृष्टः । एवं षड्नवतिविधा नायकभेदाः ॥ 1 ॥

अथाश्रयालम्बननायिकाः प्रथमं स्वीयाः परकीया इतिद्विविधाः । कात्यायनिव्रत-पराणां कन्यानां मध्ये या गान्धर्वेण विवाहिताः ताः स्वीयाः । तदन्या धन्यादयः कन्याः परकीया एव । श्रीराधाद्यास्तु प्रौढाः परकीया एव । कियन्त्यः स्वीया अपि पित्रादिशङ्कया परकीया एव । द्वारकायां रुक्मिण्याद्याः स्वीया एव । ततश्च मुग्धा मध्या प्रगल्भा इतित्रिविधाः । मध्या मानसमये धीरमध्या अधीरमध्या धीराधीरमध्या इतित्रिविधाः । वक्रोक्तिपवित्रभर्त्सनकारिणी या सा धीरमध्या । मिश्रितवाक्या या सा धीराधीरमध्या श्रीराधा । तत्र प्रगल्भा अपि धीरप्रगल्भा अधीरप्रगल्भा धीराधीरप्रगल्भा चेतित्रिविधा । तत्र निजरोषगोपनपरा सुरते उदासीना या सा धीरप्रगल्भा पालिका चन्द्रावली भद्रा च । निष्ठुरतर्जनेन कर्णोत्पलादिना या कृष्णं ताडयति सा अधीरप्रगल्भा श्यामला । रोषसङ्गोपनं कृत्वा किञ्चित्तर्जनं करोति या सा धीराधीरप्रगल्भा मङ्गला । मुग्धातिरोषेण मौनमात्रपरा एकविधैव । एवं त्रिविधा मध्या प्रगल्भा त्रिविधा मुग्धा एकविधा इतिसप्तधा । स्वीयापरकीयाभेदेन चतुर्दशविधा । कन्या च मुग्धैवैकविधा इतिपञ्चदशविधा नायिका भवन्ति इति ।

अथाष्टनायिकाः अभिसारिका वासकसज्जा विरहोत्कण्ठिका विप्रलब्धा खण्डिता कलहान्तरिका प्रोषितभर्तृका स्वाधीनभर्तृका । अभिसारयति कृष्णं स्वयं वाभिसरति या साभिसारिका । कुञ्जमन्दिरे सुरतशय्यासनं माल्यताम्बूलादिकं मदनोत्सुका करोति या सा वासकसज्जा । कृष्णविलम्बे सति तेन विरहेणोत्कण्ठ्यते या सा विरहोत्कण्ठिका । यदि यात्येव कृष्णस्तदा विप्रलब्धा । प्रातरागतम् अन्यकान्तासम्भोगचिह्नयुक्तं कृष्णं रोषेण पश्यति या सा खण्डिता । मानान्ते पश्चात्तापं करोति या सा कलहान्तरिता । कृष्णस्य मथुरागमने सति या दुःखार्ता सा प्रोषितभर्तृका । सुरतान्ते वेश्याद्यर्थं या कृष्णमाज्ञापयति सा स्वाधीनभर्तृका । एवं पञ्चदशानामष्टगणितत्वेन विंशत्युत्तरशतानि । पुनश्चोत्तममध्यमकनिष्ठत्वेन षष्ट्युत्तराणि त्रीणि शतानि । नायिकाभेदानां तासां व्रजसुन्दरीणां मध्ये काश्चिन्नित्यसिद्धाः श्रीराधाचन्द्रावल्यादयः । काश्चित् साधनसिद्धाः । तत्र काश्चिन्मुनिपूर्वाः काश्चित् श्रुतिपूर्वाः काश्चिद् देव्य इतिज्ञेयाः ॥ 2 ॥

अथ स्वभावाः । काश्चित् प्रखराः श्यामलामङ्गलादयः । काश्चिन्मध्याः श्रीराधिकापालिप्रभृतयः । काश्चिन्मृद्वीति ख्याताश्चन्द्रावल्यादयः । अथ सपक्षः सुहृत्पक्षः तटस्थपक्षो विपक्ष इति भेदचतुष्टयः स्यात् । तत्रापि काश्चिद्वामाः काश्चिद् दक्षिणाश्च । श्रीराधायाः स्वपक्षः ललिताविशाखादिः सुहृत्पक्षः श्यामला यूथेश्वरी तटस्थपक्षो भद्रा प्रतिपक्षश्चन्द्रवली । तत्र काश्चिद्वामाः काश्चिद्दक्षिणाः स्युः ।